श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ श्रीवैणवदिनशरि ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवैणवदिनशरि ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

निराकृतावृतान्धकारकाल आत्मरञ्जने
गजाचलादराधिवासिनीलनीरमुक्पदौ।
प्रशंसतां च रागतो निषेविणां चिरोक्तयः
हरिर्हरिर्हरिर्हरिर्हरिर्हरिर्हरिस्त्विति॥ **1** ॥

कर्मपूरयातसर्वसोन्मदप्रवृत्तिषु
स्मृत्युपेतवर्तमान आयतेश्च मोदवत्।
चित्तवाक्क्रियाप्रमोदकृत्त्रयीपथप्रदा -
नन्यहेतुपादयुग्ममाश्रयन्ति वैष्णवाः॥ **2** ॥

पुष्पभूरमादराङ्कवक्षसोऽधिरक्षितुः
पुष्पपादशंसमानमानसास्सुसेवकाः।
पुष्पमम्बु शुद्धमन्नमेवमादिवस्तुभिः
धीसुमाद्यवाप्नुयुर्न चेव चात्मनः कृते॥ **3** ॥

पूर्णकामपुष्पभूस्वभोगलिप्सया प्रभोः
आदृतस्य हीत्यवेयुरस्ति भोग्यवस्त्विदम्।
यद्यधर्मवानुपैति तेन नोपयन्त्यमी
क्वाप्यपावतारिणीस्थले न निष्पतन्ति च॥ **4** ॥

सचन्द्रिकेन्दुवत् समस्य निस्समस्य चाखिलो -
न्नतस्य शीतचन्द्रसस्मितास्यमोदवात्प्रियाः।
प्रसन्नमम्बु जान्नमित्युदारमत्युपाश्रिताः
अनूनमेव मज्जनादि कर्म कुर्युराह्निकम्॥ **5**॥

समर्हणाप्रभुं शरण्यमर्चना सहार्चकाः
गृहागतैकबन्धुवत्प्रवर्धनक्षितीशवत्।
प्रियं निजात्मजं यथा च वन्यमत्तहस्तिवत्
यथाह्यमूल्यरत्नमाप्तमाश्रयन्ति सादरम्॥ **6**॥

महीधरा इवाश्रिताः क्रियारता विसृत्वरा -
तिगन्धपुष्पजावृतप्रभुक्कणत्पदाञ्चिता।
सुशीतचन्द्रधीमनस्सुधासुपायिनी श्रुति -
ष्वपि त्रयीति कीर्तितोक्तिपङ्क्तिमाजपन्ति हि॥ **7**॥

रमाधवाश्रयास्स्वचित्तरञ्जकास्स्तुतीस्तथा
दुरूहवेदमौळिहार्दमेवमित्युदीरकाः।
मुनीशसद्गिरश्च गाढसाह्यकृद्रसावहाः
यथाविधि ह्यधीयते शठार्यवाप्तगाधिकाः॥ **8**॥

सुगन्धिपुष्पजातमाधवस्मृतिर्मुदाकृतिः
विधिर्लिलेख यत्पुराऽधियां नृणां ललाटके।
लिपिक्रमेण लब्धमेकमैन्द्रियं सुखं विना
विदुर्विरागिणश्च लब्धलप्स्यमानरूपिणीम्॥ **9**॥

स नीलरूपशोभितो हरिर्द्विपाचलाधिपः
प्रवाहमुद्दशाभिवृद्धमोहतो द्रवद्हृदः।
सरोमविक्रियाङ्गतस्समाधिसूचकाक्षिमी -
लनाच्च सूज्ज्वलन्मतिप्रकाशको हि नः प्रभुः॥ **10**॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवैष्णवदिनचर्यां गाथादशकेऽत्र देशिकाश्चक्रुः।
गोपालेन पुनस्तां सश्लोकार्थामकारयन् स्वमुदे॥

॥ इति श्रीवैणवदिनशरि समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥